त्वक्स्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वान्महत्त्ववत् तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत्। अव्यभिचारश्च तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि। यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिः तच्च साक्षात् परम्परया वेति नार्थान्तरम्। किञ्च अर्थान्तरस्य पुरुषदोषत्वादाभासान्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं, जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात् केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः तत्रानुकूलतर्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तं बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति। एवं पर्व्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् अतएव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वं बहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं मित्रातनयश्यामत्वे शाकपाकजत्वं जन्यानित्यत्वे भावत्वमुपाधिः तदुत्कर्षेण साध्योत्कर्षात् अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात्। तत् किं कार्य्यकारणयोरेव व्याप्तिः तथा च बहुधा व्याकुलोस्यादिति चेन्न तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात् यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपाधायकत्वात्। यदा च तादृश्यैकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धोपाधिरपि सः। यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि ग्राहकसाम्यात् तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्त्तितव्यम् न चैवम्। तथा च पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति तन्न तथापि हि साध्यव्यापकता पक्षमालम्ब्य हेतुव्यभिचार संशयाधायकत्वेन दूषणं स्यादेव। ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः अथास्ति तदा साध्यव्याप्याव्यापकत्वेनोपाधिः साध्यव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणं न च व्याप्यतदभावव्याप्यमुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यं उपाधेरात्मलाभार्थमनुकूलतर्काभावोजीवकत्वेन तस्यैव दोषत्वादिति चेन्न सोपाधावेकत्र साध्यतद्भावसम्बन्धस्य विरुद्धत्वादवच्छेदभेदेन तदुभयसम्बन्धो वाच्यः तथा च साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवनमन्तरेणोपाधिरावश्यकस्तथानुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिगमकाभावाद्दूषकत्वम्। अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्त्तते स धर्म्मस्तत्र हेतावुपाधिः स च धर्म्मी यस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः यथा आर्द्रेन्धनवत्त्वं, व्यावर्त्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके। अतएव तत्र साध्यसाधनसम्बन्धाभावः पक्षे। एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वनित्यत्वयोः सम्बन्धोनिवर्त्तमानः पक्षधर्म्मताबलादनित्यत्वाभावमादाय सिध्यति। तथा वायावुद्भूतरूपवत्त्वं निवर्त्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति अतएव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वादिति। यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्म्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वं न च धूमवह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् आपाद्याप्रसिद्धेरिति तन्न अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यं तच्च न व्यतिरेकित्वमतिप्रसङ्गात् विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रसङ्गाच्च। केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद्यत्र पक्षावृत्तिर्हेतुः यथा करका पृथिवी कठिनसंयोगात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वं न च तत्र स्वरूपासिद्धिरेव दोषः सर्व्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः। साध्यञ्च नोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गाच्च।

स चायं द्विविधः निश्चितः सन्दिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितोव्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र साधनव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये